Shri Raghunath Temple MSS. Library,
JAMMU

No. १३२८

Title स्मृति संस्कार विचार:

Author ×

Extent १० Age १८३८

Subject न्याय शास्त्र

स्मृति संस्कार विचारः

१३२८

९०

श्रीगणेशाय नमः ॥ घटगोचरस्मृतिं प्रति घटगोचरज्ञानत्वेन न हेतुता । घटनिर्विकल्पकादपि घटस्मरणापत्तेः । अवच्छि-
न्नविषयताशालित्वेन हेतुत्वं कल्पयित्वा तद्वारणेऽपि द्रव्यत्वेन घटज्ञानादिसत्त्वे घटत्वेन तत्स्मरणापत्तेः । न च घट-
त्वस्मरणं प्रति घटत्वेन ज्ञानत्वेन हेतुत्वकल्पनादेवं न तादृशस्मरणापत्तिरिति वाच्यं घटत्वेन पटादिज्ञानस्यापि त-
दानीं सत्त्वेन तथापत्तिसंभवात् । किंतु घटत्वेन तद्घटस्मरणं प्रति घटत्वेन तद्घटज्ञानत्वेन हेतुता । स्वजन्यसंस्का-
रः प्रत्यासत्तिः । एवं तथावि[illegible] संस्कारत्वेन तथाविधस्मृतित्वावच्छिन्नं प्रति विषयामिश्रितस्मृतित्वावच्छिन्नं प्रति
वा व्यापारीभूतसंस्कारत्व[illegible]तुता । तथाविधसंस्कारं प्रति तथाविधज्ञानत्वेन हेतुता वाच्या । अथोपेक्षात्मकज्ञा-
क्षा नात् स्मरणापत्तिः । न चोपेक्षान्यत्वेन हेतुत्वकल्पनान्नापत्तिरिति वाच्यं । उपेक्षात्वस्य दुर्वचत्वात् । न चोपेक्षा-
त्वं जातिः । चाक्षुषत्वादिना संकरात् । नापि संस्काराजनकत्वं । उपेक्षाज्ञानव्यावृत्तसंस्कारजनकतावच्छेदकधर्मा-
भावात् । न च ज्ञाननिष्ठतत्तद्व्यक्तित्वं संस्कारजनकतावच्छेदकं तादृशजनकतासंबंधेन संस्कारवदन्यत्वमेवोपेक्षा-
त्वं । तथा च तादृशसंबंधेन संस्कारवत्त्वेनैव हेतुत्वं पर्यवसितमिति वाच्यं । अननुगतजनकताकूटघटितत्वेन का-
रणतावच्छेदकस्याननुगमात् । अत्र पुनः स्मृतिं प्रत्येव ज्ञानस्य तत्तद्व्यक्तित्वेन हेतुत्वं जनकतासंबंधेन तादृशस्मृति-
मत्त्वेनैव संस्कारं प्रति हेतुत्वे यस्य यस्यापि विनिगमनाविरहः प्रसक्त एव । संस्कारं प्रति स्मृतिजनकत्वेन जनकत्वे ज्ञान ॥

स्म·सं·
१

स्वस्मृतिजनकताज्ञानाधीनं संस्कारजनकताज्ञानं संस्कारजनकताज्ञानाधीनमेव स्वजन्यसंस्कारसंबंधेन स्मृ
तिजनकताज्ञानं इत्यन्योन्याश्रयप्रसंगादिति चेत् अन्ना नायत्वाप्रातिस्विकरूपेण वउपेक्षात्मकज्ञानव्यक्ती।
नां भेदकूटः कारणतावच्छेदककोटौ निवेश्यते। यत्तु। चाक्षुषत्वादिव्याप्याः नानैव उपेक्षात्वजातयः। तदव
च्छिन्नप्रतियोगिकान्याल्पीयांसो भेदा जनकतावच्छेदककोटौ निवेश्यंते। न च जातेरांशिकत्वभिया आंशिका
पेक्षाज्ञानताव्याजातेरस्वीकारे आंशिकोपेक्षाज्ञानात् स्मरणापत्तिरिति वाच्यं। आंशिकोपेक्षाज्ञानानां अनंत
व्यक्तीनां प्रातिस्विकरूपेणैव भेदनिवेशात्। एवमपि सर्वांशोपेक्षासहस्राणां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस
हस्रनिवेशापत्त्या लाघवादिति। तन्न। शुद्धधीमहिमतथाविधजातीनां अनुगतनियामकाभावात् तुल्ययुक्त्या आहा
र्यत्वादेरपि जातित्वापत्त्या सांकर्यापाताच्च। आहार्यत्वस्यानुगतोपाधिरूपस्य दुर्वचत्वात्। सर्वांशोपेक्षात्मकज्ञा
नभेदानां संस्कारजनकतावच्छेदकतावच्छेदककोटावेव निवेश्यते। न ज्ञाने निष्ठस्मृतिजनकतावच्छेदककोटौ। त
त्र संस्कारविरहेणैव स्मृतिविरहोपपत्तेः। न च विनिगमनाविरहः। संस्कारजनकतावच्छेदककोटौ भेदानिवेशो १
उपेक्षात्मकज्ञानेभ्यो ऽप्रामाणिकानंतपदसंस्कारकल्पनापत्तेः। आंशिकोपेक्षाभेदानां तु तेः सह विशेष्यविशेषण
भावविनिगमनाविरहभिया स्मृतिजनकतायामेव निवेश्यते। न चात्र विनिगमनाविरहः। आंशिकोपेक्षाज्ञा

नात्। अन्यांशेस्मरणोदयात्तदनुरोधेन तद्धेतुसंस्कारस्यावश्यकत्वात्संस्कारजनकतायां आंशिकोपेक्षात्म
कज्ञानव्यक्तिभेदानिवेशे एतद्विषयकत्वधर्ममात्रकल्पनादितरथा तु धर्मिकल्पनमिति धर्मिकल्पनातो धर्
मिकल्प्यकल्पनाल्लघीयसीत्यतस्यैव विनिगमकत्वात्। एतेन ज्ञानस्मरणयोर्ज्ञानत्वस्मरणत्वाभ्यामेव कार्य
कारणभावो न तु विषयनिवेशेन। पटज्ञानात् घटस्मृतेः संस्काराभावेनापत्तिवारणात्। न च संस्कारस्म
रणयोः कार्यकारणभावे विषयनिवेशानुक्रियतदृश्यत्र विनिगमनाविरह इति वाच्यं संस्कारस्मरणयोः कार्यका
रणभावे तन्निवेशे घटगोचरोपेक्षात्मज्ञानसत्वे पटसंस्कारसत्वे घटस्मरणापत्तेः। न च संस्कारस्वरूपव्यापारसंबंधेन
घटज्ञानाभावाज्ञापत्तिरिति वाच्यं। घटांशेउपेक्षात्मकपटांशेउपेक्षात्मकज्ञानजन्यसंस्कारसत्वे घटस्मरणापत्ते अ६
रित्यस्यापरिष्कारापरास्तात्। आंशिकोपेक्षाभेदानां स्मृतिजनकतायामेव निवेशात् घटांशेउपेक्षाज्ञानादपि घटगोच
रसंस्कारोदयात् तदनंतरं घटस्मरणापत्तेः तदन्यपटज्ञानानंतरं सत्वादिति। घटस्मृतिं प्रति घटांशेउपेक्षान्यतद्गोचर
ज्ञानत्वेन हेतुतायां आवश्यकत्वात् संस्कारस्मरणयोः कार्यकारणभावे तु विषयता निवेशापेक्षस्याभावात् तत्र
स्मृतित्वसंस्कारत्वाभ्यामेव कार्यकारणभावः। पटगोचरसत्वे घटांशेउपेक्षान्यघटज्ञानस्य संस्कारसंबंधेना
सत्वादेवनापत्तिः। यथा चैवं संस्कारस्य सविषयकत्वं व्यवच्छिन्नस्तत्सर्वमग्रे विवेचयिष्यते। न चैवमनुमिति

स्मृ॰सं॰

२

लक्षणस्य विशिष्टस्मरणेऽतिव्याप्तिसंपादकस्य संस्कारानुसत्यैवेत्यादिग्रन्थस्यासंगतिः स्मृतिजनकतायां आंशि
कोपेक्षान्यत्वनिवेशात् । अनुमितिजनकतायां च तन्निवेशादिति वाच्यं । तावता सतेरभावात् । वस्तुतस्तु अयेतत्सं
गमनप्रकारो दूषयिष्यते । एवं च भूतलत्वधर्मितावच्छेदकतद्भूतलविशेष्यकघटत्वावच्छिन्नतद्घटप्रकारकस्मृतिप्र
तितथाविधनिश्चयत्वेन हेतुता । अतो न संशय्याकारज्ञानात्स्मरणापत्तिः । अथ संस्कारजनकतावच्छेदककोटावेव निश्च
यत्वं निवेश्यं तत एव स्मरणवारणसंभवे किं स्मृतिजनकतायां तन्निवेशेन । न च विनिगमनाविरहः संशयादपि धर्मि
णो विशेषकल्पितकोट्योरपि स्मरणोदयेन संस्कारकल्पनायास्तत्रावश्यकत्वादिति वाच्यं । एवं सति संस्कारजनकता
वच्छेदके तन्निवेशे संशयजन्यसंस्कारे विशिष्टविषयताकल्पनगौरवात् । न चापेक्षाभेदः सह विशेष्यविशेषण
भावे विनिगमनाविरह इति स्मृतिजनकतायामेव तन्निवेश्यत इति वाच्यं । तथापि आंशिकोपेक्षाभेदः सह तस्यसंगा
दितिमिवं स्मृतिजनकतावच्छेदककोटौ निश्चयत्वानिवेशे संशयानन्तरं स्मृतिवारणासंभवात् । न च संस्काराभावाद् २
एव न स्मृतिरिति वाच्यं । धर्म्यंश एव संस्कारसत्वात् । न च भूतलत्वावच्छिन्नविशेष्यतानिरूपिततद्घटप्रकारताशालि सं
स्कारविरहात् न तथाविधस्मरणमिति वाच्यं । तथात्वेन संस्कारस्य हेतुत्वाकल्पनात् स्मृतिं प्रति संस्कारत्वेनैव हेतुत्वात् ।
तदवच्छिन्नस्य धर्मिगोचरसंस्कारस्यैव सत्वात् तादृशापत्तिसंभवात् तस्माज्जनकतावच्छेदककोटौ निश्चयत्वनिवेशनमा

वत्पकमेवेति। अथोपेक्षान्यत्वं न स्मृतिजनकतावच्छेदकं अपि तु उपेक्षात्मकज्ञानास्मृतिवारणाय संस्कारेष्विति उपेक्षा
ज्ञानानां तत्तद्व्यक्तित्वेन प्रतिबंधकत्वमास्थीयते। न चोपेक्षात्मकज्ञानानंतरं अपेक्षात्मकज्ञानानुत्पन्नं संस्कारानुदय
प्रसंग इति वाच्यं उपेक्षात्मकज्ञानेनाज्ञानंतरमेव तत्र संस्कारोदयात्। न च यत्रादौ उपेक्षात्मकज्ञानं तदनंतरं चापेक्षा
त्मकं तद्द्वितीयक्षणे च पुनरुपेक्षांतरं तत्र संस्कारानुदयप्रसंग इति वाच्यं। तदुपेक्षात्मकव्यक्तेः प्रतिबंधकत्वाकल्पने
क्षतिविरहात्। न चाननुगतमित्याशंकनीयं। तन्मते विशेषणविशेष्यभावविनिगमनाविरहेण महागौरवात्। इत्थं च
विशिष्टस्मरणे ऽतिव्याप्तिः। आंशिकोपेक्षात्मकज्ञानानामपि संस्कारप्रतिबंधकतयैवोपपत्तौ स्मृतिजनकतावच्छेदक
तायां तन्निवेशात्। इत्यानूपरं भेदः। सर्वांशोपेक्षायाः प्रतिबध्यतावच्छेदकं संस्कारत्वं आंशिकोपेक्षायास्तज्जातीयसं
स्कारत्वमिति। जातो ऽन्यो वा संस्कारे व्यभिचारः संस्कारानुत्पत्तेरेवेत्याशयोपपत्तिरपि तु तु व्याख्यातुं शक्यते इति यदि
विभाव्येत तदा संस्कारनिष्ठस्मृतिजनकतायां विषयनिवेश आवश्यकः। अन्यथा घटांशउपेक्षातो ऽपि पटस्मृत्यावच्छिन्न
तत्पटविशेष्यकसंस्कारसत्वात् तत्संस्कारसंबंधेन घटज्ञानसत्वात्। इत्थं च निश्चयत्वमपि संस्कारजनकतावच्छेदकको
टावेव निवेश्यते। संशयाद्युत्तलत्वावच्छिन्नधर्मिकघटप्रकारकसंस्काराभावाव[illegible]नात् द्वास्मरणापत्त्यसंभ
वात्। न चोपेक्षावत्संशयस्यापि विशिष्टसंस्कारप्रतिप्रतिबंधकत्वमस्तु किं तदन्यत्वेन हेतुतयेति संशयानंत

स्म॰सं॰
३

र्वयत्रेति निश्चयः तत्र विनष्टघटत्वसंशये संस्कार उपपद्यत इति वाच्यं अपेक्षाबुद्ध्यात्मकसंशयानंतरं तदनात्मकनिश्चया
द्यत्र च संशयानंतरं स्वीयाऽप्रामाण्यविषयको निश्चयस्तदनंतरमुत्पन्नः संशयस्तत्र संस्कारानुदयप्रसंगात्॥
अथ ज्ञानस्मरणयोर्हीनत्वस्मरणत्वाभ्यामेव कार्यकारणभावोक्तः तत्र विषयनिवेशो निरर्थक इति चेत् स्थित एव
तत्तात्तथा सति क्षतिविरहात् एवं संशयात्मकसंस्काराभावादनुगतोद्बोधकादिविशिष्टसंस्काररूपया स्मृति
सामग्र्याः विशिष्टस्मरणेच्छाविशिष्टया अनुभवं प्रति प्रतिबंधकतायां संस्कारे तदभावप्रकारकान्यत्वानिवेशोपि
लाघवान्न चैवमन्मतेपि तदभावप्रकारकान्यत्वं प्रतिबंधकतावच्छेदककोटौ न निवेश्यत इति वाच्यं संशयाकारसं
स्कारसत्वेऽनुभवोपपत्तये तदन्यत्वनिवेशस्यावश्यकत्वात् अथात्र घटत्वनिश्चयत्वेन घटप्रतियोगिकाभावाप्र
ना कारकत्वात् तद्धर्माभाववद्घटे भ्रमत्वमित्याकारकज्ञाने घटवद्भूतलमि[illegible]ति स्मरणानुदयप्रसंगात् नापि घट
त्वावच्छिन्नाभावाप्रकारकत्वं नीलघटवन्नवेति संशयात् घटस्मरणापत्तेः न च घटत्वपर्याप्तप्रकारतानालिङ्गितान ३
त्वेन न तथाविधस्मरणं प्रति हेतुत्वेन विशेषापत्तिरिति वाच्यं नीलघटवद्धिति ज्ञानादपि नीलांशमोषदशायां घट
वद्धिति स्मरणोदयात् तथा हेतुतायाः कल्पयितुमशक्यत्वात्॥ अत्र केचित् संशये उभयप्रकारतानिरूपिताए
केव विशेष्यता अन्यत्र तु प्रकारताभेदाद्विशेष्यताभिन्ना तथा चाभावाप्रकारतानवच्छिन्नघटप्रकारतावच्छिन्ने

नघटस्मरणाप ३

भूतलत्वावच्छिन्नविशेष्यताशालित्वेन भूतलत्वावच्छिन्नधर्मिकघटप्रकारकस्मृतिं प्रति हेतुत्वेतिन कश्चिद्दोष इत्याहुः।
तद्दूषितमन्यत्रावस्थितस्य संस्कारस्य जनकतायामेव निश्चयत्वनिवेशात् न काप्यनुपपत्तिः। तथाहि। घटत्वातिरिक्तध
र्मानवच्छिन्नघटत्वावच्छिन्नप्रकारतावच्छिन्नभूतलत्वावच्छिन्नविशेष्यताशालिघटत्वावच्छिन्नाभावाप्रकारकज्ञा
नत्वेन हेतुता कल्प्यते। नीलघटवदित्याकारकज्ञानात् नीलघटवदित्याकारकसंस्कारः प्रजायते न तु कदाचिदपि
घटवदित्याकारकः संस्कारः स्मृतिहेतुतायां तु पर्याप्तिनिवेशात् नीलांशमोषदशायां घटवदिति स्मरणमिति
रत्ना ६ न काप्यनुपपत्तिरिति। न च नीलघटवदित्याको नीलांशउपेक्षात्मकात् घटवदिति संस्कारोदयात् कथं संस्कारज
नकतायां पर्याप्तिनिवेशः स्यादिति। तच्च तु नीलघटवदिति संस्कारोनापपद्यते नीलसंस्कारं प्रति नीलांशउपेक्षा
ज्ञानस्य प्रतिबन्धकत्वकल्पनात्। अन्यथा तदनन्तरं नीलस्मरणप्रति नीलसंस्कारस्य जनकतायां तत्संस्कारभेद
निवेशादेव तादृशास्मरणवारणे तज्ज्ञानस्य नीलसंस्कारं प्रति प्रतिबन्धकत्वाकल्पनात् तदानीं नीलघटवदित्याका
रकसंस्कारस्यैवापपत्तेरिति सम्यगालोकयामः। अथ निश्चयत्वं संशयाकारस्मरणवारणायैव निवेश्यते। तथा च
घटाभाववत्तास्मरणं प्रति घटाभावप्रकारकज्ञानस्य हेतुतायां निश्चयत्वानिवेशेनैव संशयाकारस्मरणवारणं श
क्यं उभयकोटिज्ञानस्यैव संशयतया घटवन्नवेति संशयस्य घटाभावानिश्चयात्मकतया ततो घटाभावस्मरणानु

स्म॰सं
४
५

दयेनैव संशयाकारस्मरणासंभवादिति। घटवत्ताज्ञानहेतुतायां निश्चयत्वनिवेशो निरर्थकः। इत्थं च विशिष्टस्मरणे इति
व्याप्तिरपि न संगच्छते। अन्यथा वह्निव्याप्यधूमवत्तास्मरणे तज्ज्ञानस्य हेतुतायामपि निश्चयत्वानिवेशात्। न च
संशयादेककोटिस्मरणमपि न जायत इति वाच्यं प्रमाणाभावात्। नाप्येवं तादृशानुभवविरोधः येन गुरुणा निश्च
यत्वेन हेतुत्वमभ्युपेयत इति। स्मृतिं प्रति निश्चयत्वेन हेतुत्वमङ्गीकुर्वतो दीधितिकृतापि निश्चयत्वनिवेशस्य सं
शयाकारस्मरणवारणमेव फलमित्याशयोऽवसीयते। न च घटवत्ताज्ञानहेतुतायामपि निश्चयत्वं निवेश्य संशयाकार
स्मरणवारणसंभवे तत्रैव किं न निवेश्यत इति विनिगमकाभावादुभयत्रैव निवेशः स्यादिति वाच्यं। घटवत्तानिश्च
वत्ता यस्य घटाभाववत्तावच्छिन्नप्रकारतान्यत्वरूपस्य घटाभाववज्ज्ञानीयनिश्चयत्वापेक्षया गुरुशरीरत्वात्तत्रैव निश्चय
त्वस्य निवेशयितुमुचितत्वात्। वस्तुतस्तु न कुत्रापि निश्चयत्वनिवेशः। निश्चयत्वेन हेतुत्वेपि प्रसिद्धे निश्चयज[illegible]
नितसंस्काराभ्यां नियातोद्बोधकसमवधानदशायां संशयाकारस्मरणवारणार्थं एककोटिस्मरणसामग्र्याः प
रकोटिस्मरणं प्रति प्रतिबंधकतायां आवश्यकत्वे तेन संशयाकारकज्ञानजन्यसंस्कारादपि संशयाकारस्मरणा ४
वारणादिति चेन्न। संस्कारजनकतावच्छेदककोटौ निश्चयत्वानिवेशे संशयाकारज्ञानात् संशयाकारसंस्कारोत्पत्तौ
अननुगतकालादीनामतन्नाशकत्वस्वीकार्ये संशयाकारस्मरणस्य कदाप्यनुदयात्। अन्यविधस्मरणस्यापि

समानाकारकत्वेन ताभ्यां संस्कारनाशकतयाऽनुगतहेतुतायाः तन्नाशानिर्वाहादिति गौरवात् [illegible]तु संशयात्मकोपेक्षात्म
कज्ञानादेकैककोटिस्मरणवारणाय तत्तज्ज्ञानानां प्रातिस्विकरूपेणानंतभेदनिवेशाच
गौरवात् । अननुगतसंशयान्यत्वरूपनिश्चयत्वनिवेशे लाघवाच्च । एतत्पूर्वोक्तपक्षिका निरस्ता । न चोपेक्षान्यत्वम
पि अननुगतमेव निवेशयितुं शक्यते प्रागेव दूषितत्वात् । ननु संस्कारे किं मानं । अनुभवध्वंसस्य व्यापारत्वसंभवा
त् । प्रतियोग्यभावयोरेकजातीयजनकत्वप्रवादस्य प्रमाणाभावेनाग्राह्यत्वात् । न च स्मृतिप्रतिबंधकत्वापत्तिः कारणी
भूताभावप्रतियोगित्वस्यैव प्रतिबंधकतापदार्थत्वादिति वाच्यं । संसर्गाभावत्वावच्छिन्नायाः अभावत्वावच्छिन्ना
या वा जनकतायाः प्रतियोगितावच्छेदकत्वसंबंधेनावच्छेदको यो धर्मस्तदवच्छिन्नस्य प्रतिबंधकतापदार्थत्वात् । अत्र
चाभावत्वेनाजनकत्वादिति । न च ज्ञाने न द्वितीयक्षणजनितसंस्कारेण तृतीयक्षणे स्मरणं स्यात् ध्वंसस्य व्यापार
त्वासंभवात् । ध्वंसस्य प्राक्कालेऽनुभवध्वंसाभावादिति वाच्यं । तत्रापि क्षणविलंबेनैव स्मरणाभ्युपगमादिति चे
न्न । संस्कारानभ्युपगमे उपेक्षात्मकज्ञानादपि स्मरणापत्तेः । न च स्मृतिं प्रत्युपेक्षान्यज्ञानत्वेनैव हेतुत्वकल्पनान्नानु
पपत्तिरिति वाच्यं । गौरवात् । न च भवन्मतेऽप्युपेक्षात्मकज्ञानात्संस्कारवारणाय तत्तज्जनकतायामुपेक्षान्यत्वनि
वेशस्यावश्यकत्वेन साम्यमिति किं अतगडुना स्मृतिजनकतावच्छेदककोटौ तन्निवेशेनैव सर्वसामंजस्यमिति वा

च्यां संस्कारं प्रति उपेक्षान्यज्ञानत्वेन हेतुत्वकल्पनस्य गुरुत्वेन फलमुखत्वात् स्मृतिजनकतावच्छेदककोटिप्रविष्टं
त्रितयोपेक्षाज्ञानभेदकूटेन सर्वांशोपेक्षात्मकज्ञानभेदकूटेन सह हि विशेषणविशेष्यभावविनिगमनाविरहेण गौरव
संपादकानामनिवेशेन लाघवात् सर्वांशोपेक्षाभेदानामेव कारणतावच्छेदकीभूतस्य संस्कारं प्रति ज्ञानस्य हेतुतायाः
कल्पयितुमु त्वात् चित । एवं संस्कारस्वीकारे संस्कारं प्रति उपेक्षाज्ञानप्रतिबंधकतयोपपत्तौ स्मृतिजनक
तायामुपेक्षाभेदसहस्राणां विशेषणविशेष्यभावविनिगमनाविरहेण गौरवसंपादकानामनिवेशेन लाघवात् न
च स्मृतिं प्रति उपेक्षात्मकज्ञानानां प्रतिबंधकत्वं कल्प्यतामिति वाच्यं । कालांतरे स्मरणापत्तेः । न च तत्तद्ध्वंसानां प्रतिबंधक
त्वमस्त्विति वाच्यं । यत्र कस्यचिज्ज्ञातोपेक्षाज्ञानानंतरं तद्ध्वंसकज्ञानोत्पत्तावपि स्मरणानुदयप्रसंगात् । प्रकारांत
रानुसरणे तु गौरवं । एवं विपरीतज्ञाने संस्कार नाशपत्याद्यापि संस्कारस्य सिद्धिरन्यथा विपरीतज्ञानानंतरमपि अनुभव
नाशात् संस्कारेण स्मरणापत्तेः । मम तु विपरीतज्ञानेन संस्कारनाशात् संस्कारस्यैव कार्यविरहादेव स्मरणावारणात् । न च ५
विपरीतज्ञानध्वंसस्य प्रतिबंधकत्वात् नापत्तिरिति वाच्यं । विपरीतज्ञानोत्तरोत्पन्नानुभवनाशात् स्मरणानुदयाप
त्तेः । अथ भूतलत्वावच्छिन्नधर्मिकघटवत्तास्मृतिं प्रति भूतलत्वावच्छिन्नधर्मिकघटवत्ताज्ञानध्वंसाभावविशि
ष्टभूतलविशेष्यकघटाभावप्रकारकज्ञानध्वंसत्वेन प्रतिबंधकता ह्यभावस्य स्वप्रतियोगिविशिष्टध्वंससामानाधि

करण्यसंबंधावच्छिन्नप्रतियोगिताकः स्वप्रागभावविशिष्टस्वसामाधिनाकरण्यसंबंधावच्छिन्नप्रतियोगिताको
वायाभ्यः। तेन विपरीतज्ञानोत्तरं प्राग्ज्ञानानुदयेपि पूर्वज्ञानध्वंससत्त्वान्नस्मरणापत्तिः। अथवा विपरी
तज्ञानध्वंसाभावग्राह्यध्वंसस्य हेतुत्वान्न विपरीतज्ञानोत्तरं स्मरणापत्तिः। विपरीतज्ञानध्वंसाभावस्य स्व
प्रागभावविशिष्टस्वसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताको ग्राह्यः। अतो न विपरीतज्ञानोत्तरोत्प
न्नानुभवनाशात्स्मरणानुपपत्तिरिति चेत् न गौरवात्। तदपेक्षया संस्कारं स्वीकृत्य संस्कारनाशं प्रति वि
परीतज्ञानस्य जनकत्वकल्पनस्यैव लाघवेनोचितत्वात्। अयोद्बोधकानां अननुगततद्रूपेण वै हेतुत्वकल्पना
द्विपरीतज्ञानानंतरं फलानुदयेनोद्बोधकस्यैवाकल्पनान्न स्मरणापत्तिः। न च संबंधिज्ञानादीनामेवानुगतहे
तुतायाः संभवात् विपरीतज्ञानोत्तरं तादृशानुगतोद्बोधकत्वे स्मरणापत्तिरिति वाच्यं। तेषामपि व्यक्तिपौर्वा
पर्यनिर्वाहाय तत्तद्व्यक्तित्वेन हेतुत्वकल्पनाया आवश्यकत्वात् विपरीतज्ञानोत्तरव्यक्तीनां च फलावश्यंभा
वेन हेतुत्वकल्पनाभावात् आपत्त्यसंभवादिति चेन्मैवं तेषां तत्तद्व्यक्तित्वेन हेतुत्वकल्पनेपि सामान्यसाम
ग्रीतः सामान्यधर्मावच्छिन्नापत्तेः। न च तत्तद्विशेषसामग्रीसहकृताया एव सामान्यसामग्र्याः फलजनक
त्वान्न दोष इति वाच्यं। अनंततत्तद्व्यक्तीनां प्रातिस्विकरूपेण सहकारित्वकल्पने गौरवात्। अन्यथापि ज्ञास

कज्ञानानंतरमपि उद्बोधकविरहेण वा स्मरणसंभवे[illegible]ि उपेक्षान्यत्वेनापि हेतुताविलयप्रसंगात्। उक्तयुक्त्या अ
नुभवादिहेतुताविलयापत्तिश्चेति वदंति। अथ संस्कारस्य सविषयकत्वे किं मानं। न च स्मृतिविषयतानिया
मकत्वेन तद्विषयतासिद्धिः ज्ञानविषयतायास्तन्नियामकत्वात्। न च विपरीतज्ञाननाश्यतावच्छेदकतासिद्धिः।
घटज्ञानजन्यसंस्कारत्वस्यैव घटाभाववत्ताज्ञाननाश्यतावच्छेदकत्वात्। न च तादृशगुरुधर्ममपेक्ष्य घटगो
चरसंस्कारत्वस्यैवावच्छेदकत्वोचितत्वात् संस्कारविषयतासिद्धिरिति वाच्यं। लौकिकचाक्षुषजन्यसंस्कारस्यानुमाना
द्विपरीतज्ञाननाश्यतया ज्ञानविशेषजन्यतायास्तत्रावश्यं निवेश्यत्वात्। न च स्मृतिनाश्यतावच्छेदकतया तत्सि
द्धिः घटज्ञानजन्यसंस्कारस्य पटगोचरस्मरणानाश्यत्वात् घटगोचरस्मरणस्य घटगोचरसंस्कारत्वस्यैव नाश्यताव
च्छेदकत्वात् घटज्ञानजन्यसंस्कारत्वस्य तथात्वे गौरवादिति वाच्यं। विपरीतज्ञानादिजन्यसंस्कारनाशे व्यभिचारवार
णाय स्वसामानाधिकरण्यविशिष्टकालिकविशेषणतासंबंधेन स्मरणविशिष्टसंस्कारनाशत्वस्य जन्यतावच्छेद ६
कतया आवश्यकत्वेनैव व्यभिचारवारणे विशेषनिवेशं विनाप्युपपत्तेः। न च मास्तु व्यभिचारः एवमपि कदाचिद्घ
टज्ञानजन्यसंस्कारस्य नाशः कदाचित्तज्जन्यतज्जन्यस्येति नियामकाभाव इति वाच्यं। प्रतियोगितासंबंधेन संस्कार
नाशं प्रति जनकतासंबंधेन स्मरणत्वेन हेतुताभ्युपगमात् घटज्ञानजन्यसंस्कारस्य परस्मरणाजनकतया तत्र ज

नकतासंबंधेनस्मरणाभावान्नातिप्रसंगइतिचेत्न।ज्ञानजन्यतावच्छेदकतयासंस्कारविषयतासिद्धेः।तथाहिसंस्का
रंप्रतियद्धिज्ञानस्यविषयाभिष्वितएवतज्ज्ञानत्वेनहेतुतानतदाउपेक्षात्मकज्ञानात्संस्कारवारणायघटपदादिविष
यकानंतोपेक्षाभेदानामेकत्रनिवेशगौरवात्।परंतुघटविषयकज्ञानत्वादिनाजनकताऽन्यतावच्छेदकंचयदिसं
स्कारत्वंतदाव्यभिचारइतिघटविषयकसंस्कारत्वमेवतथेतितत्सिद्धिः।यद्धिचोपेक्षाज्ञानभेदानांकारणतावच्छेद
ककोटौननिवेशः।किंतुतादृशज्ञानात्संस्कारादिवारणायसंस्कारान्प्रतितेषांप्रतिबंधकत्वकल्पनमेवसमीचीनं
लाघवात्।तथाचसंस्कारविषयतायांयुक्त्यभावइतिविभाव्यतेतथापिआंशिकोपेक्षाज्ञानप्रतिबध्यतावच्छेदकत
या~~[illegible]~~संस्कारविषयतासिद्धिः।तथाहिसर्वांशोपेक्षाज्ञानस्यप्रतिबध्यतावच्छेदकंसंस्कारत्वंतत्सत्त्वेकुत्रापि
चासंस्कारोनस्यात्तद्वत्आंशिकोपेक्षाज्ञानस्यप्रतिबध्यतावच्छेदकंयदिसंस्कारत्वंतदाधर्म्यंशेऽपिसंस्कारानुदय
प्रसंगइतितत्तद्विषयकसंस्कारंप्रतितत्तद्व्यक्तित्वेनप्रतिबंधकत्वंकल्प्यमितिसंस्कारविषयतासिद्धिः।एवंसं
स्कारस्यविषयतानभ्युपगमेघटादावुपेक्षात्मकज्ञानानंतरंघटस्मरणापत्तिःव्यापारसंबंधेनघटज्ञानसत्त्वात्।
नचोपेक्षान्यज्ञानस्यैवसंस्कारसंबंधेनहेतुत्वोपगमान्नापत्तिरितिवाच्यंतथापिघटस्मरणादेरपिघटज्ञानजन्य
संस्कारनाशापत्तिः।नचाचरीस्याप्रतियोगितासंबंधेनसंस्कारनाशंप्रतिजनकतासंबंधेनस्मृतित्वेनहेतुत्वान्न

दोषइतिवाच्यं।अनवच्छेदकतायाःस्वरूपयोग्यतारूपायाःप्रत्यासत्तेःघटज्ञानजन्यसंस्कारस्यापिसंस्कारत्वेननिखिल
स्मृतिस्वरूपयोग्यतयातादृशसंबंधेनघटस्मृतेरपितत्रसत्वात्।ननुघटस्मृतिंप्रतिघटज्ञानजन्यसंस्कारत्वे
नैवस्वरूपयोग्यतेतिवाच्यं।तदपेक्षयालाघवेनघटविषयकसंस्कारत्वेनैवतत्कल्पनायाऔचित्यात्प्रकृत
सिद्धिः।नापिफलोपधायकतायाःप्रत्यासत्तित्वं।अननुगमात्।यच्चसामानाधिकरण्यमेवनाश्यकृतावच्छेदप्र
त्यासत्तिः।तथापिनिस्तारः।तेनसंबंधेनघटेस्मरणस्यपटज्ञानजन्यसंस्कारेसत्वात्तन्नाशापत्तेर्वारणादेवतत्
सिद्धिः।नचप्रत्यभिज्ञातघटादिगोचरसंस्कारनाशस्यजन्यतावच्छेदकत्वेपितादृशधर्मावच्छिन्नस्यैवपटसंस्कारेआ
पत्तिःकारणतावच्छेदकप्रत्यासत्त्यातत्कारणसत्वादितिवाच्यं।तादृशसंस्कारनाशत्वावच्छिन्नंप्रतितादृशप्रत्यास
त्त्यातादृशसंस्कारत्वेनहेतुत्वकल्पनात्।नचसामानाधिकरण्यस्यस्वरूपयोग्यतायावाप्रत्यासत्तित्वेस्मरण
जन्यसंस्कारस्यक्षणिकत्वोपपत्तिः।स्वजन्यसंस्कारेतादृशप्रत्यासत्तिभ्यांस्मरणसत्वात्।अतउपधायकतायाःप्र
त्यासत्तित्वंतत्संस्कारनाशत्वंचजन्यतावच्छेदकंवाच्यमितिकुतःसंस्कारस्यविषयतासिद्धिरितिवाच्यं।क्षणिकसंस्का
राभ्युपगमेसंभवात्।तृतीयक्षणेतज्जन्यसंस्काराद्देवस्मरणनिर्वाहात्।अस्तुवा।ननुगतोपधायकतायाःप्र
त्यासत्तित्वं।ततोसंस्कारनाशतानांजन्यतावच्छेदकत्वेपेक्ष्यलाघवादिनस्यरववस्तुज्ञानत्वेनैवसंस्कारहेतुत्वं।वि

= स्मृतिः = नाशः   = इतिः ५ = तत्कार्यतावच्छेदकं ७

नस्यपरत्वस्य तत्वं च न तत्वाश्रयनाशविशिष्टत्वं। आश्रयस्यात्मनो नाशासंभवात्। अपितु स्वप्रागभावविशिष्टकालिकविशेषण
तयाकृतिविशिष्टत्वमतो नानानुगमः। तथा च तत्तीयक्षण एव ज्ञानेन संस्कारजननात्। नाशस [redacted] णिकसंस्कारापत्तिः। अ
थवा स्वसामानाधिकरण्यावच्छिन्नस्वप्रागभावसंबंधेन स्मृतित्वेन नाशकतायाम् अभ्युपगमात् स्वजन्यसंस्कारस्य नानात्
नाशः स्वप्रागभाववत्वलक्षणसंबंधाभावात्। वस्तुतस्तु शब्दादीनां क्षणिकतावारणाय प्रतियोगिनासंबंधेन नाश
५१ त्वावच्छिन्नं प्रति स्वप्रतियोगिमत्वसंबंधेन नाशत्वेन हेतुत्वं कल्पनीयम्। आवश्यकत्वात् तत एव सर्वत्र क्षणिकतावारणसं
भवादिति। एवमनुमित्यात्मकविपरीतज्ञानस्य कार्यतावच्छेदकं यदि संस्कारनाशत्वं तदाऽनुमित्यात्मकविपरीतज्ञा
नात् लौकिकचाक्षुषजन्यसंस्कारापत्तिः। यदि च लौकिकज्ञानजन्यसंस्कारनाशत्वं तदा घटवद्भूतलमिति ज्ञानात्
पिपरीतचरसंस्कारनाशाप्रसंगः। न च लौकिकज्ञानजन्यघटवद्भूतलमिति ज्ञानजन्यसंस्कारनाशत्वावच्छिन्नं प्रति
घटाभाववद्भूतलमिति निर्णयत्वेन हेतुत्वमतो न दोष इति वाच्यम्। जन्यत्वादिनिवेशे गौरवात्। लाघवात्तु तंद्रौलौ
किकज्ञानाजन्यतद्विशेष्यकतत्प्रकारकसंस्कारनाशत्वावच्छिन्नं प्रति तद्विशेष्यकतदभावप्रकारकनिर्णयत्वेन हेतुत्वोपगमात् त
द्वच्छिन्नजन्यतावच्छेदकघटकतया संस्कारविषयतासिद्धिरिति। एवं संस्कारविषयताभ्युपगमे घटस्मरणादिसामा
न्यसामग्र्या उद्बोधकादिविशिष्टघटज्ञानजन्यसंस्कारत्वेनैव प्रतिबंधकत्वं अनुभवं प्रति कल्पनीयमिति गौरवं॥

स्मृ॰सं॰

९

मन्मतेघटविषयकसंस्कारत्वेनातिलाघवात् । न च मन्मतेपि संस्कारसंबंधेन घटज्ञानत्वेन स्मृतिं प्रति बंधकत्वात् न गौरवमि
ति वाच्यं । संस्कारादिना घटादिस्मरणकाले ज्ञानरूपप्रतिबंधकाभावसत्वेन प्रतिबध्यज्ञानापत्तिरिति संस्कारजन्यस्मरण
स्य घटगोचरस्मरणत्वेन हेतुताजन्यतावच्छेदकं घटविषयकसंस्कारनाश्यतां प्रत्यासत्तिर्विचारितैव ॥ अथ स्मरणस्य सं
स्कारनाशकत्वमानाभावः स्मरणेनापि संस्कारस्य जननात् स्मरणोत्तरमपि स्मरणोदयात् पूर्वसंस्कारसत्वेपि क्षतिविर
हादिति चेत् । न । अनुभवानंतरं यत्नोपेक्षात्मकस्मरणं तदनंतरं स्मरणवारणाय तथात्वस्यावश्यकत्वात् । अथ काल
रोगादिजन्यसंस्कारनाशे व्यभिचारः कालादिजन्यत्वस्य निवेशे तु तुल्ययुक्त्या तज्जन्यतावच्छेदककोटावपि स्मरणजन्य
त्वस्य निवेशोऽन्योन्याश्रयात् । नापि वैजात्यं तन्नाश्यतावच्छेदकं तुल्ययुक्त्या विपरीतज्ञानजन्यतावच्छेदकतयापि वैजा
त्यसिद्ध्यापत्तेः एकमात्रनाश्यसंस्कारेऽपि प्रत्येकपरीहारेण वर्त्तमानयोस्तयोर्घटस्मरणपटविपरीतज्ञाननाश्ययोर्घटपटसाचर
से मूर्त्तत्वेन संस्कारसांकर्यापत्तेः । तत्र वैजात्यांतरस्वीकारे इति गौरवापत्तेरिति चेत् । न । यस्यासु सामानाधिकरण्यादिवि
शिष्टकालिकविशेषणतया स्मरणविशिष्टसंस्कारनाशत्वमेव तावच्छेदकं रोगकालादीनां चाननुगत
तया तत्तद्व्यक्तित्वे विपरीतज्ञानस्य च वैजात्यं । न च विनिगमनाविरहः किं स्मरणस्य नाश्यतावच्छेदकं तद्विपरीतज्ञानस्य
वेति वाच्यं । विपरीतनिश्चयस्य नाशकतायां नाशकतावच्छेदकगौरवात् । अत एव विशिष्टस्य नाशकतावच्छेदकत्वस्व

कार्यतावच्छेदककोटिप्रविष्टविशेषणानां विशेष्यविशेषणभावेन नानाधर्मावच्छिन्नकारणतायाः बाहुल्यापत्तेः। तत्रैवैव
१ ज्ञातस्य नाशकतावच्छेदकत्वौचित्यात् इति। अथ समूहालम्बनसंस्कारस्य प्रत्येकगोचरस्मरणान्नाशोपत्तिः घटपटोभय
विषयकसंस्कारस्य घटपटविषयकतया तन्नाशकीभूतघटस्मरणस्य सत्त्वात्। न च पटविषयकसंस्कारस्ते नाशे पटस्म
रणस्य हेतुत्वात् तस्य पटविषयकत्वेन पटस्मरणरूपनाशकाभावान्न नाशक इति वाच्यं। पटस्मरणं विनापि स्वकार्य
तावच्छेदकावच्छिन्नजननात् आपि तदापत्तिसंभवात् तन्नाशस्यानुपगमे चानन्तरं पटस्मरणानुपपत्तिरिति। न च चर
मस्मृतित्वेन नाशकत्वानुरोधे इति वाच्यं। चरमत्वस्य निर्वक्तुमशक्यत्वात्। न च स्वजनकसंस्कारजन्यस्मृतिप्रागभा
वविशिष्टान्यत्वं जनकत्वादिकं च फलोपधायकत्वादिरूपं ग्राह्यं। अन्यथा संस्कारान्तरजन्यस्मृतिप्रागभावकालीनस्या
पि चरमत्वानुपपत्तिरिति वाच्यं। स्वत्वघटितत्वेन तदननुगमात् तस्य प्रतियोग्युपधायकसंस्कारोपहितत्वविशिष्टका
लिकसंबन्धेन स्मृतिप्रागभावविशिष्टं यत्तदन्यत्वरूपस्यापि अननुगतोपधायकताघटितत्वात्। प्रथमस्मृतेस्संस
त स्कारनाशायिता चरमैकशालिनी न भवति अन्यस्मृतेस्तथा भवतीत्यत्र नियामकाभावाच्च। न चैवं तस्यैव चरमत्वे तत्
त्वफलबलमेव कल्प्यं अतो न दोष इति वाच्यं। तादृशजातेरेकस्या एव सकलस्मरणनाशकतावच्छेदकत्वे घटपटोभयकु
ड्यकुड्मलोभयतादृशसंस्कारद्वयजनितात् घटपटविषयककुड्यकुड्मलविषयकसंस्कारनाशापत्तिः घटपटावितिसं
स्कारनाशकत्वानुरोधेन तादृशजातिस्तत्रावश्यमभ्युपेया कुड्यकुड्मलावितिसंस्कारनाशकतावच्छेदकजातेः घटसंस्कार

स्म·सं·

१ रनाशकतावच्छेदकत्वात्यन्यथेत्वेन घटसंस्कारनाशकस्मरणकुड्यसंस्कारनाशकस्मरणयोः परस्परपरीहारेणवर्तमानयो
रुभयसंस्कारनाशकसमूहालंबनस्मरणसांकर्यापत्तेः। न च चरमस्मृतितयावच्चरमस्मृतिसाधारणीरेकैवजातिःका
र्यकारणभावस्तत्तद्विषयकसंस्कारनाशत्वतद्विषयकचरमस्मृतित्वाभ्यामिति नोक्तदोषइतिवाच्यं। तादृशीऽजातिःप्र
थमस्मरणनास्तिकिंतुचरमस्मृतावित्यत्रानुगतनियामकाभावात्अननुगतानां तत्तत्क्षणादीनामेवमंगीकार्यमिति
महत्तरवै ता। नचान्येनगत्या तादृशगौरवसहिष्णुतास्त्वितिवाच्यं। गत्यंतरस्य वक्ष्यमाणत्वादितिचेत्। अत्र
केचित्। घटविषयकसंस्कारत्वेन नाश्यता घटस्मरणेन नाशकता। एवं घटपटोभयगोचरसंस्कारत्वेन नाश्यता घट
पटस्मरणत्वेन नाशकता। विशिष्टप्रतीयोगिनामपितथाहेतुत्वंकल्प्यतेऽनायससाहुः। अन्ये तु। समूहालंबनता
नाऽपिघटादिप्रत्येकविषयतानानैव संस्कारा जायंते न तु समूहालंबनसं स्कारः। तथा च घटस्मरणेन घटसंस्का
रोनश्यतिनान्यः। न च समूहालंबनसंस्कारानभ्युपगमेपि घटवद्भूतलमिति ज्ञानानंतरं विशिष्टविषयकएवसंस्कारोऽभ
भ्युपेयः। अन्यथा विशिष्टस्मरणानुपपत्तिः तथाभूतलोद्बोधकविरहकालीनघटमात्रविषयकस्मरणात्विशिष्ट १
२३ संस्कारनाशापत्तिरितिवाच्यं। घटमुख्यविशेष्यकसंस्कारस्यैव घटस्मरणनाश्यतावच्छेदकत्वात्। घटवद्भूतलमिति
संस्कारनाशो विशिष्टविषयकस्मृतित्वेन हेतुत्वं तरस्यावश्यकत्वात्। अन्यथा विशेषकलित घटभूतलयोः स्मर
णात्तथाविधसंस्कारनाशापत्तिः। अथैवमपि घटवद्भूतलं पटवदिति संस्कारस्य घटाभाववद्भूतलमितिविपरीतज्ञा

नेन नाशेऽपरत्ववदिति स्मरणानुपपत्तेः। न च यत्र यादृशविशिष्टस्मरणमुत्पद्यते तत्रापि घटवद्भूतलं पटवद्भूतलमिति सं
स्कारद्वयमेवाभ्युपेयते न तु विशिष्टविषयताशाली एकः संस्कार इति वाच्यं कुत्रचिदपि विशिष्टविषयकसंस्कारस्याव
श्यकत्वे तत्रैव तादृशसंस्कारघटकीभूतएकधर्मावच्छिन्नेऽपरधर्मावच्छिन्नप्रतियोगिताकाभावसत्वे × ज्ञान ×
नतादृशसंस्कारनाशापत्तेः। न चेष्टापत्तिः। तादृशविपरीतज्ञानोत्तरं तथाविधविशिष्टस्मरणापलापप्रसंगादि
ति चेन्न। तादृशानुभवस्य प्रामाणिकत्वे तद्धर्मावच्छिन्नमुख्यविशेष्यकतद्धर्मावच्छिन्नप्रकारकसंस्कारनाशताव
च्छिन्नं प्रति तद्धर्मावच्छिन्नविशेष्यकतद्धर्मावच्छिन्नाभावप्रकारकज्ञानत्वेन हेतुत्वान्नानुपपत्तिः। न च तथापि वह्नि
व्याप्यभाववान् धूम इति ज्ञानकाले वह्निव्याप्यो धूम इति संस्कारसत्वे विपरीतज्ञानकारणबलात्तन्नाशापत्ति
रिति वाच्यं। तादृशसंस्कारनाशं प्रति तादृशसंस्कारस्यापि प्रतियोगिविधया हेतुत्वेन तदभावादेव तथापत्यस
न यादिस्याहुः॥ ॥छ॥ ॥छ॥ इति स्मृतिसंस्कारविचारः समाप्तः॥छ॥ संवत् १७३८ आश्विन संस्कृ त्र
तिपदि त्र्यंबकभट्टप्रतिष्ठानकेरणकात्र्यां लिखितोऽयं ग्रंथः॥ ॥श्रीरामचंद्र॥

स्मृ॰सं॰
१०
10

स्मृतिसार
श्लो॰
१८८

१०